# N 586

Seat No. [ ]

2024 III 11 1100 -N 586- SANSKRIT (27) (SECOND OR THIRD LANGUAGE) (SK)

(REVISED COURSE)

**Time : 3 Hours** (Pages 19) **Max. Marks : 80**

---

**सूचना :**

(1) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

(2) यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।

(3) आकृतीनाम् आलेखनं मसीलेखन्या अङ्कन्या वा कर्तव्यम्।


## प्रथमः विभागः—सुगमसंस्कृतम् [8]

1. (अ) चित्रं दृष्ट्वा नामानि लिखत। (5 तः 4) 4

(1) 

(2) 

(3) 

(4) 


(5) 

(आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2) 2

(1) १८

(2) एकोनसप्ततिः

(3) षट्त्रिंशत्

(इ) समय-स्तम्भमेलनं कुरुत। 2

| 'अ' | 'आ' |
|---|---|
| (1) पञ्चोन-षड्वादनम् | १.३५ |
| (2) सपाद-सप्तवादनम् | ४.३० |
| (3) सार्ध-चतुर्वादनम् | ५.५५ |
| (4) पञ्चत्रिंशदधिक-एकवादनम् | ७.१५ |

Allpyqs.com

## द्वितीयः विभागः—गद्यम् 20

2. (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। 7

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत्, 'वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।' तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत्। तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः। तत्रागतः मृगः पाशैर्बद्धः। सः अचिन्तयत्, "इदानीं मित्राण्येव शरणं मम।" दूरात् तत् पश्यन् जम्बूकः मनसि आनन्दितः। सोऽचिन्तयत्,

"फलितः मे मनोरथः। इदानीं प्रभूतं भोजनं प्राप्स्यामि।" मृगस्तं दृष्ट्वा अब्रवीत्, "मित्र, छिन्धि तावन्मम बन्धनम्। त्रायस्व माम्।" जम्बूको दूरादेवावदत्, "मित्र, दृढोऽयं बन्धः। स्नायुनिर्मितान् पाशानेतान् कथं वा व्रतदिवसे स्पृशामि ?" इत्युक्त्वा सः समीपमेव वृक्षस्य पृष्ठतः निभृतं स्थितः।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः। मृगं तथाविधं दृष्ट्वा स उवाच, "सखे! किमेतत्?" मृगेणोक्तम्, "सुहृद्वाक्यस्य अनादरात् बद्धोऽहम्। उक्तं च—

सुहृदां हितकामानां यः शृणोति न भाषितम्।
विपत् सन्निहिता तस्य सः नरः शत्रुनन्दनः॥"

काकः अब्रूत, "स वञ्चकः क्वास्ते ?" मृगेणोक्तम्, "मन्मांसार्थी तिष्ठत्यत्रैव।" काकः उक्तवान्, "उपायस्तावत् चिन्तनीयः।"

(1) **अवबोधनम्। (4 तः 3)** 3

(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। 1

(1) एकस्मिन् दिने ........................ पाशः योजितः।

(क्षेत्रपतिना/जम्बूकेन)

(2) फलितः मे ........................।

(कार्यभागः/मनोरथः)

(ख) पूर्णवाक्येन उत्तरं लिखत। 1

क्षुद्रबुद्धिः कुत्र निभृतं स्थितः ?

Allpyqs.com

(ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

क्षेत्रम् आगतः शृगालः पाशैर्बद्धः।

(घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ? 1

(2) **शब्दज्ञानम्। (3 तः 2)** 2

(क) लकारं लिखत। 1

इदानीं प्रभूतं भोजनं <u>प्राप्स्यामि</u>।

(ख) सन्धिविग्रहं कुरुत। 1

वनेऽस्मिन् = .................. + ....................।

(ग) प्रश्न-निर्माणं कुरुत। 1

प्रदोषकाले मृगमन्विष्यन् <u>काकः</u> तत्रोपस्थितः।

(3) **पृथक्करणम्।** 2

क्रमेण योजयत।

(1) क्षेत्रपतिना पाशयोजनम्।

(2) शृगालेन मृगाय सस्यपूर्णक्षेत्रस्य दर्शनम्।

(3) मृगस्य पाशबन्धनम्।

(4) मृगस्य प्रत्यहं क्षेत्रं गमनम्।

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

एकस्मिन् दिने आचार्यः शिष्यगणेन सह गङ्गास्नानार्थम् अगच्छत्। तदा कोऽपि दरिद्रः मलिनकायः, जीर्णवस्त्रधारी मनुष्यः तस्य पुरतः आगच्छत्। तं शिष्याः तम् 'अपसर अपसर' इति उच्चैः अवदन्।

## 5/N 586

सः मनुष्यः अपृच्छत्–''अपसर, अपसर इति कं वदसि ? शरीरं वा आत्मानं वा ? आत्मा तु परमेश्वरस्य अंशः अतः सर्वेषां समानः एव। तथा च सर्वेषां शरीराणि पञ्चमहाभूतात्मकानि। तर्हि कथं तव शरीरं मम शरीराद् भिन्नम्, अहं च त्वद् भिन्नः ?'' वेदान्ततत्त्वस्य सारं तस्य मुखात् श्रुत्वा आचार्यः तं प्रणनाम। ज्ञानं तु कस्मादपि ग्राह्यम्। यस्माद् ज्ञानं लभते स गुरुरेव इति विचारेण आचार्यः तत्रैव 'मनीषापञ्चकम्' इति स्तोत्रं रचितवान्।

एवम् आसेतुहिमाचलं पर्यटन् अद्वैत–सिद्धान्तस्य प्रचारम् अकरोत् सः।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥

**(1) अवबोधनम्। (4 तः 3)** **3**

(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत। 1

शङ्करः मलिनकायं मनुष्यं प्रणनाम यतः .........................।

(1) मलिनकायः मनुष्यः शङ्करं सङ्कटात् अरक्षत्।

(2) सः मलिनकायः मनुष्यः वेदान्तस्य सारं जानाति स्म।

(ख) कः कं वदति ? 1

'अपसर अपसर' इति कं वदसि ?

(ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

यस्मात् ज्ञानं लभते सः गुरुः।

(घ) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत। 1

मार्गे कोऽपि <u>मनुष्यः</u> तस्य पुरतः आगच्छत्।

(2) **शब्दज्ञानम्। (3 तः 2)** **2**

(क) सन्धिविग्रहं कुरुत। 1

पूर्वपदं उत्तरपदं च लिखत

(1) तत्रैव = ................ + एव।


(2) कस्मादपि = कस्मात् + ................।

(ख) **विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| **'अ'** | | **'आ'** |
|---|---|---|
| (1) दरिद्रः | – | (1) शरीरम् |
| (2) भिन्नम् | – | (2) शिष्यः |
| | | (3) मनुष्यः |

(ग) गद्यांशात् द्वे त्वान्त-अव्यये चित्वा लिखत। 1

(3) **जालरेखाचित्रं पूरयत।** **2**




Allpyqs.com

(इ) **माध्यमभाषया सरलार्थं लिखत। (2 तः 1)** **4**

(1) रदनिका — एहि वत्स! शकटिकया क्रीडावः।

दारकः — (सकरुणम्) रदनिके! किं मम एतया मृत्तिकाशकटिकया; तामेव सौवर्णशकटिकां देहि।

रदनिका — (सनिर्वेदं निःश्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहारः ? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि। (स्वगतम्) तद्यावद्विनोदयाम्येनम्। आर्यावसन्तसेनायाः समीपमुपसर्पिष्यामि। (उपसृत्य) आर्ये! प्रणमामि।

(2) नद्यौ — रे विश्वामित्र, नैव विरमावः त्वत्कृते। नैव कुर्वः देवेन्द्रस्य कार्ये अधिक्षेपम्।

विश्वामित्रः — नैव मातः, मास्तु देवेन्द्रस्य अवज्ञा। केवलम् इच्छामः। परतीरं गन्तुम्। हे मातः, प्रसीद। वयं सर्वे तव पुत्राः एव। न वयं कदापि तव उपकारान् विस्मरामः।

Allpyqs.com

(ई) **माध्यमभाषया उत्तरं लिखत। (2 तः 1)** **2**

(1) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत् ?

(2) सर्कसक्रीडायाः आरम्भात् पूर्वं किं किम् अभवत् ?

# 8/N 586

## तृतीयः विभागः—पद्यम् 18

(अ) **पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **4**

> **वृथाभ्रमणकुक्रीडापरपीडापभाषणैः।**
> कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्॥
> उत्तमो नातिवक्ता स्यादधमो बहु भाषते।
> सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते॥
> यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
> तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
> यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
> तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥

(1) **पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (3 तः 2)** **2**

(क) **पूर्णवाक्येन उत्तरं लिखत।** 1

कः बहु भाषते ?

(ख) **पद्यांशात् विशेषणं चित्वा लिखत।** 1

(1) ................................ द्विपः।


(2) ................................ मनः।

(ग) **सन्धिविग्रहं कुरुत।** 1

किञ्चिज्ज्ञोऽहम् = ................................ + ................................

AllVyas.com

(2) जालरेखाचित्रं पूरयत। **2**




**(आ) माध्यमभाषया उत्तरं लिखत। (2 तः 1)** **2**

(1) जटायुरावणयोः सङ्घर्षस्य वर्णनं कुरुत।

(2) 'वैद्यराज नमस्तुभ्यं' अस्य श्लोकस्य स्पष्टीकरणं कुरुत।

**(इ) पद्ये शुद्धे पूर्णे च लिखत। (क, ख तः 1, ग, घ तः 1)** **6**

(1) (क) विद्या नाम ................................ दैवतम्॥ **4**

**अथवा**

(ख) भिक्षुः क्वास्ति ........................ पातुः वः॥

(2) (ग) यत्र विद्वज्जनो ........................ द्रुमायते॥ **2**

**अथवा**

(घ) आत्मनो ........................ सर्वार्थसाधनम्॥ **2**

Allyas.com

**(ई) अन्वयं पूरयत।** 2

अल्पानाम् ........................................ अपि .............................. कार्यसाधिका।

यथा .............................. आपन्नैः .............................. मत्तदन्तिनः बध्यन्ते।

**(उ) माध्यमभाषया सरलार्थं लिखत। (3 तः 2)** 4

(1) अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा।
सर्वविधसुविद्यार्थं वाचनमुपकारकम्॥

(2) एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम्।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम्॥

(3) सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा॥

## चतुर्थः विभागः—लेखनकौशलम् 9

**(अ) धातूनाम् अव्ययानां च विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (6 तः 4)** 4

(क) रक्ष् (1 प. प.)

(ख) स्पृह् (10 उ. प.)

(ग) गम् (गच्छ्) (1 प. प.)

(घ) अलम्

(च) नमः

(छ) उपरि

अथवा

संस्कृतानुवादं कुरुत। (6 तः 4) 4

(1) शिक्षक खडूने फळ्यावर लिहितो.

शिक्षक फलक पर खड़िया से लिखता है।

The teacher writes on the board with the chalk.

(2) विद्यार्थ्यांनी दररोज अभ्यास करावा.

विद्यार्थी प्रतिदिन पढाई करें।

Students should study everyday.

(3) मी फुलांचा वास घेतो.

मैं फूलों को सूँघता हूँ।

I smell the flowers.

(4) तू रेल्वे स्थानकावर जा.

तुम रेल स्थानक पर जाओ।

You go to the railway station.

(5) बाळ! स्वेटर आण.

बेटा! स्वेटर लाओ।

Oh child! bring the sweater.

(6) पेटीत दहा पुस्तके आहेत.

संदूक में दस किताबें हैं।

There are ten books in the box.



Allpyqs.com

(आ) 5-7 वाक्यात्मकं निबन्धं लिखत। (3 तः 1) 5


(1) मम प्रियः खगः।

(2) मम प्रियः उत्सवः।

(3) भारतीयं प्रसिद्धं स्थलम्।

**अथवा**

**साहाय्यक-शब्दानाम् आधारेण 5-7 वाक्यात्मकं चित्रवर्णनं कुरुत।** 5




(**मञ्जूषा** — वहति, खादति, संमार्जयति, करोति, भ्रामयति, तिष्ठति, रक्षति, **चलति**)

# पञ्चमः विभागः—भाषाभ्यासः

**(अ)** तालिकापूर्तिं कुरुत। 8

(1) **नामतालिका। (6 तः 4)** 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| .............. | मालाभ्याम् | .............. | तृतीया |
| भगवते | .............. | .............. | चतुर्थी |
| .............. | .............. | जन्मसु | सप्तमी |

(2) **सर्वनामतालिका। (6 तः 4)** 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| .............. | इमौ | .............. | प्रथमा |
| कस्मात् | .............. | .............. | पञ्चमी |
| .............. | .............. | तासु | सप्तमी |

(3) **क्रियापदतालिका। (6 तः 4)** 2

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लृट् | .............. | .............. | द्रक्ष्यन्ति | प्रथमः पुरुषः |
| लङ् | आसीः | .............. | .............. | मध्यमः पुरुषः |
| लट् | .............. | लिखावः | .............. | उत्तमः पुरुषः |



Allyqs.com

(4) धातुसाधित-विशेषण-तालिका। (6 तः 4) 2

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| कथ् (10 उ.प.) | ............. | कथितवान् | कथ्यः | .............. |
| लभ् (1 आ.प.) | लब्धः | ............. | ............. | लभमानः |
| प्र + विश् (6 प.प.) | प्रविष्टः | ................ | प्रवेश्यः | .............. |

आ) निर्दिष्टाः कृतीः कुरुत। (4 तः 3) 9

(1) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (5 तः 3) 3

(क) श्रीकृष्णः देवक्याः .................................... (८) अपत्यम्।

(क्रमवाचकम्)

(ख) वर्षस्य .................................... (४) परीक्षा भवति।

(आवृत्तिवाचकम्)

(ग) भगवता व्यासेन .................... (१८) पुराणानि रचितानि।

(सङ्ख्यावाचकम्)

(घ) भारतशासनेन .................... (३) चान्द्रयानं प्रेषितम्।

(क्रमवाचकम्)

(च) 'अष्टाध्यायी' नाम्नि ग्रन्थे ................ (८) अध्यायाः सन्ति।

(सङ्ख्यावाचकम्)

Allpyq.com

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | प्रत्यहम् | अहनि अहनि। | ..............। |
| (ख) | .............. | जलं ददाति इति। | उपपद-तत्पुरुषः। |
| (ग) | असत्यम् | न सत्यम्। | ..............। |
| (घ) | व्याघ्रभल्लूकौ | ..............। | इतरेतर-द्वन्द्वः। |
| (च) | पन्नगभूषणः | ..............। | बहुव्रीहिः। |

(3) **समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत। (5 तः 3)** 3

(क) पुरतः × ..............................।

(ख) सुगमः = ..............................।

(ग) सूर्यः = ..............................।

(घ) अनित्यः × ..............................।

(च) पिता = ..............................।

https://www.maharashtrastudy.com

(4) **सूचनानुसारं कृतीः कुरुत। (5 तः 3)** 3

(क) सः महोदयम् उपगम्य वदति।

(पूर्वकालवाचकं ल्यबन्त अव्ययं निष्कास्य वाक्यं पुनर्लिखत।)

(ख) मे आत्मा कृतार्थतां लभताम्।

(वाक्यं लङ्लकारे परिवर्तयत।)

(ग) त्वया किं दृष्टम् ? (वाच्य परिवर्तनं कुरुत।)

(घ) भवान् स्वीकरोतु। (भवान् स्थाने त्वं योजयत।)

(च) छात्रः लेखं लिखति। (अध्यापकः) (णिजन्तं कुरुत।)

## षष्ठः विभागः—अपठितम्

8

**(अ) गद्यांशं पठित्वा कृतीः कुरुत। (6 तः 4)** 4

स्त्रीणां स्वातन्त्र्यस्य प्रथमा प्रणेत्री पण्डिता रमादेवी महाराष्ट्रभूमेः सुकन्या आसीत्। डोंगरेकुले व्युत्पन्नः अनन्तशास्त्री एतस्याः पिता। सुशीला लक्ष्मीबाई च माता। संस्कृते तस्याः **विशेष**-अनुरागः। सरस्वत्याः प्रसादात् सा वक्तृत्वे अपि निपुणा आसीत्।

यद्यपि बहवः ग्रन्थाः तया पठिताः तथापि सा स्वतन्त्रबुद्धिः एव आसीत्। सा प्रगत-अध्ययनार्थम् आङ्ग्लदेशं गता। किन्तु तया न स्ववेषः त्यक्तः, न वा स्वभाषा। रमादेवी नाम विविधगुणानां सुन्दरः कोषः आसीत् खलु।

(1) पूर्णवाक्येन उत्तरं लिखत। 1

स्त्रीणां स्वातन्त्र्यस्य प्रथमा प्रणेत्री का आसीत् ?

(2) प्रातिपदिकं लिखत। 1

(क) ग्रन्थाः

(ख) तया

(3) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

रमादेवी प्रगत-अध्ययनार्थम् आङ्ग्लदेशं गता।

(4) माध्यमभाषया सरलार्थं लिखत। 1

रमादेवी वक्तृत्वे निपुणा आसीत्।

Allpyqs.com

(5) गद्यांशात् एकम् अव्ययं चित्वा लिखत। 1

(6) **कारकपरिचयं कुरुत।** 1

<u>संस्कृते</u> तस्याः विशेष-अनुरागः।

**(आ) (1) पद्यांशं पठित्वा निर्दिष्टे कृतीः कुरुत।** 2

गुरुणा शोभते शिष्यः, शिष्येणापि गुरुस्तथा।

उभाभ्यां शोभते शाला, शालया शोभते पुरम्॥

(क) **पूर्णवाक्येन उत्तरत। (2 तः 1)** 1

(1) गुरुणा कः शोभते ?

(2) पुरं कया शोभते ?

(ख) **समानार्थकं शब्दं लिखत।** 1


गुरुः = ...................................... ।

Allpyqs.com

(2) **पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** **2**

पक्षिणां बलम् आकाशं, बालानां रोदनं बलम्।

दुर्बलस्य बलं राजा, मत्स्यानाम् उदकं बलम्॥




Allpyqs.com